ISSN : 2583-2271
Vol. - I, No. 1: 2021

# वैदिकभाषायामुपसर्गाणां व्यवहार:

**ड. गगनचन्द्रदे**

**प्रबन्धसारः**

*संस्कृतसरस्वत्या वेदमयी वाणी, देववाणी, आदिभाषा इत्यादीनि नामानि सन्ति।संस्कृतभाषायामादिमा ग्रन्था वेदा निबद्धाः सन्ति। "आदौ वेदमयी दिव्या" इति महाभारतवचनानुसारं संस्कृतभाषा "वेदमयी वाणी" इत्युच्यते। "देवीं वाचमजनयन्त देवाः" (ऋ.सं.-८/१००/११) इति ऋग्वेदीयमतानुसारम् इयं भाषा "दैवी वाणी" इत्यप्युच्यते। भाषाया द्विविधं रूपं भवति-लौकिकभाषारूपं वैदिकभाषारूपञ्च। पाणिनीयव्याकरणशास्त्रे लौकिकानां वैदिकानाञ्च शब्दानां विवेचनं क्रियते इति पतञ्जलिना महाभाष्ये प्रतिपादितम्।संहिताकाले लोकभाषास्वरूपं किमासीदिति_स्पष्टतया न किञ्चित् वक्तुं पार्यते।*

*संस्कृतभाषायां सम्पूर्णशब्दराशिर्नामाख्यातोपसर्गनिपातभेदेन चतुर्धा विभक्तो दृश्यते। ऋग्वेदसंहितायां पदविभागस्य बलवत्तरं प्रमाणमुपलभ्यते।तद्यथा-*

*"चत्वारि वाक्यपरिमितानि पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः।*
*गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति॥ (ऋ.सं.- १/१६४/४५)*

*संस्कृतवाङ्मयस्य विविधशास्त्रेषूपसर्गशब्दो नानाविधेष्वर्थेषु व्यवहारो दृश्यते। शुक्लयजुर्वेदस्य प्रस्तावनायामुव्वटाचार्येण प्रतिपादितम्।यत्-"अथ विंशतिरुपसर्गाः क्रियाविशेषकरा इति सामान्यतोऽर्थः। विशेषार्थास्त्वनन्ता एव। महाभाष्ये पतञ्जलिना उक्तम्-*

*"को हि नाम समर्थो धातुप्रातिपदिकप्रत्ययनिपातानामर्थानादेष्टुम्।" (म.भा.-२/१/१)*

*वैदिकभाषायामुपसर्गाणां व्यवहारः कीदृशः परिलक्ष्यते? अर्थात् (१) वैदिकभाषायामुपसर्गाणां प्रयोगः, (२) वैदिकभाषायां पादपूरणार्थका उपसर्गाः, (३) वैदिकभाषायां वीप्सामूलका उपसर्गाः, (४) वैदिकभाषायां प्रादयो भिन्ना उपसर्गाः, (५) वैदिकसाहित्ये धात्वर्थे उपसर्गाणां प्रयोगः इत्यादि विषये प्रबन्धेऽस्मिन् आलोच्यते।*

भाषासङ्घटकतत्त्वानां सङ्कलने, उच्चारणे, निर्धारणे, संख्याने च यादृशी तत्त्वबुभुत्सैकतानता दृश्यते वैदिकवाङ्मया-र्णवे, न तादृशी अभिनिवेशिनी तत्त्वदृष्टिः अवलोक्यतेऽन्यासु भारोपीयासु भाषासु। महाकविकालिदासेनोक्तं यत् –

"स वृत्तचूलश्चलकाकपक्षकै-
रमात्यपुत्रैः सवयोभिरन्वितः।
लिपेर्यथावद्ग्रहणेन वाङ्मयं
नदीमुखेनेव समुद्रमाविशत्॥"[1] इति पद्धतिमधिकृत्य आधुनिकभारोपीयभाषा- सरिन्मुखेन वैदिकवाङ्मयार्णवं प्रवेष्टुमवगाहितुं वा पार्यते। ख्रीष्टशताब्दीतोऽष्टसहस्राब्दीतः प्राक् प्रवाहितो वैदिकवाङ्मयार्णवः प्राच्याधुनिकभारोपीय-भाषामयीषु धारासु शतधा विभज्यमानोऽप्यजस्ररूपेण स्वकीयां मौलिकीं स्रोतोवहतां प्रख्यापयति संस्कृतभाषामुखेन। एवंविधायां संस्कृतभाषा-यामाविष्कृताः सर्वा ज्ञानशाखा: स्वीयामात्मोपलब्धिं प्रथयन्ति वैदिकसाहित्ये। पारिषत्कृतेरपि शब्दसाध्व-साधुविज्ञानस्य, अर्थराशेः, सङ्कोचविस्तरस्य, वर्णागमस्य, वर्णविकारस्य, वर्णनाशस्य, वर्णविपर्ययस्य, धात्वर्थस्य, धात्वर्थातिशयस्य च तत्त्वपार्यवसानिको निर्णयस्तत एवोररीक्रियते। वस्तुत: सर्वविद्यायां निर्णयानां कृते श्रुतिस्तु स्वत: प्रमाणभूतैव।

संस्कृतभाषायां सम्पूर्णशब्दराशिः नामाख्यातोपसर्गनिपातभेदेन चतुर्धा विभक्तो दृश्यते। ऋग्वेदसंहितायां पदविभागस्य बलवत्तरं प्रमाणमुपलभ्यते। तद्यथा –

"चत्वारि वाक्परिमिता पदानि
तानि विदुर्ब्राह्मणा ये मनीषिणः।
गुहा त्रीणि निहिता नेङ्गयन्ति
तुरीयं वाचो मनुष्या वदन्ति॥"[2]

निरुक्तकारेण प्रतिपादितम् "कतमानि तानि चत्वारि पदानि – नामाख्यातोप-सर्गनिपाताश्चेति वैयाकरणाः।"[3] महाभाष्य-कारेण तदेव समर्थितम्। यत् – "चत्वारि वाक्परिमिता पदानि चत्वारि

[1] रघुवंशमहाकाव्यम् - ३/२८।

[2] ऋग्वेदसंहिता - १/१६४/४५।

[3] निरुक्तम् - १३/९॥

पदजातानि नामाख्यातोपसर्गनिपाताश्च”[4]। तत्र उद्योतकारेण प्रतिपादितं यत् – “नामाख्यातेति - नामशब्देन सुबन्तं, नमत्याख्यातार्थं प्रति विशेषणीभवतीति व्युत्पत्तेः। आख्यातं तिङन्तम्। उपसर्गनिपातयोः पृथगुपादानं गोबलीवर्दन्यायेन”[5]।

संस्कृतवाङ्मयस्य विविधशास्त्रेषु उपसर्गशब्दस्य नानाविधेष्वर्थेषु व्यवहारो दृश्यते। उप + सृज् + घञ् = उपसर्गः। उपसृज्यते इत्युपसर्गः। अथवा उपसृजतीत्युपसर्ग इति व्युत्पत्तिः। आचार्यसायणाचार्येण ऋग्वेदभाष्ये उक्तम् - “प्रागुपसृजत आख्यातपदस्येत्युपसर्ग:”[6] इति। दुर्गाचार्य्यस्त्वन्यथैव व्याकरोति उपसर्गशब्दं निरुक्तव्याख्यायाम् “उप उपगृह्य आख्यातं तस्यैवार्थविशेषं सृजन्तीत्युपसर्गाः”[7] इति। नाट्यशास्त्रेऽपि उपसर्गशब्दस्य व्युत्पत्तिर्भाषाशास्त्र-सम्मता दृश्यते –

“प्रातिपदिकार्थयुक्ता धात्वर्थानुपसृजन्ति ये स्वार्थे।
उपसर्गा ह्युद्दिष्टास्तस्मात्संस्करतस्तस्मिन्॥”[8]

अर्थात् प्रातिपदिकार्थसहिता एत उपसर्गा धात्वर्थान् स्वार्थे उपसृजन्ति अतिरिक्तमर्थविम्बं प्रोद्भावयन्त्युत्पादयन्ति वा। प्रमाणयति च व्याख्यामिमाम् अभिनवगुप्ताचार्यः “धात्वर्थानुपसृजन्ति उपरागेणान्यादृशान् कुर्वन्ति। तेनोपरागेण प्रातिपदिकार्थस्य युक्तसम्बन्धे प्रकरोतीति हि शब्दः” इति। निरुक्तस्य महेश्वरव्याख्यायामुपसर्गशब्दो व्याख्यातुकामेन महेश्वरेणोक्तम् “उपेत्य नामाख्यातयोरर्थस्य विशेषं सृजन्ति उत्पादयन्ति इत्युपसर्गा:[9] इति।

**उपसर्गः** – “धातो: पूर्ववर्त्तिविंशति-संख्यकप्राद्यव्ययम्। यथा – प्र, परा, अप्, सम्, नि, अव, अनु, निर्, दुर्, वि, अधि, सु, उत्, परि, प्रति, अभि, अति, अपि, उप, आङ्। अस्य प्रमाणम् –

“निपाताश्चादयो ज्ञेया उपसर्गास्तु प्रादयः।
द्योतकत्वात् क्रियायोगे लोकादवगता इमे॥”[10]

उव्वटाचार्येण प्रतिपादितं यत् – “अथ विंशतिरुपसर्गाः क्रियाविशेषकरा इति सामान्यतोऽर्थः। विशेषार्थास्त्वनन्ता एव”[11] इति। शौनकोऽपि बृहद्देवतायां वक्ति यत् –

“उपसर्गास्तु विज्ञेयाः क्रियायोगेषु विंशतिः॥
विवेचयन्ति ते त्वर्था नामाख्यात-विभक्तिभिः॥”[12]

अर्थात् क्रियायागे उपपन्ना उपसर्गा विंशतिः, किन्तु तेषामर्थास्त्वनन्ता एव। यतो हि नामाख्यातविभक्तिभिस्तैर्नवनवा अर्था उद्भाव्यन्ते। अत एव पतञ्जलिना उक्तम् – “को हि नाम समर्थो धातुप्रातिपदिकप्रत्यय-निपातानामर्थानादेष्टुम्”[13]। उपसर्गाः त्रिधा। यथा – “धात्वर्थं बाधते कश्चित्”। यथा आदत्ते। “कश्चित्तमनुवर्तते” यथा - प्रसूते। “तमेव विशिनष्ट्यन्य:” यथा – प्रणमति। “उपसर्गगतिस्त्रिधा”[14]। अपि च मुग्धबोधटीकाकार-दुर्गादासेन उक्तम् –

“उपसर्गेण धात्वर्थो बलादन्यत्र नीयते।
नीहारहारसंहारप्रतीहारप्रहारवत्॥”[15]

## (क) वैदिकभाषयामुपसर्गाणां प्रयोगः

१) “ते प्राग्धातोः” (१.४.८०), २) “छन्दसि परेऽपि” (१.४.८१), ३) “व्यवहिताश्च” (१.४.८२) अर्थात् उपसर्गा धातो: प्राक् प्रयोक्तव्याः। प्राक् प्रयोगे प्राप्ते छन्दसि परेऽप्यभ्यनुज्ञायन्ते। न च परेषां प्रयुज्यमानानां संज्ञाकार्यं किञ्चिदस्ति। केवलं परप्रयोगेऽपि क्रियायोग एषामस्तीति ज्ञाप्यते। व्यवहिताश्च गत्युपसर्गसंज्ञका: छन्दसि दृश्यन्ते।

### १. छन्दसि पूर्वप्रयोगस्योदाहरणम्। यथा

)i) प्रयाह्यच्छतो यविष्ठा। प्र + या = प्रयाहि। ऋग्वेदः - 10.1.7

(ii) यथा नकुलो विच्छिद्य संदधात्यहिं पुनः। सम् + धा = संदधाति। शौनकीयसंहिता – 6.139.5 (iii) यदेनश्चकृमा वयमिदं तदवयजामहे स्वाहा।अव + यज् = अवयजामहे। माध्यन्दिसंहिता – 3.45 (iv) तदधेदमृभवो नानुगच्छथ। अनु + गम् = अनुगच्छथ। ऋग्वेदः - 1.161.11

(V) उष आ भाहि भानुना चन्द्रेण दुहितर्दिवः।आ + भा = आभाहि। ऋग्वेदः - 1.48.9

(vi) अपो वसाना दिवमुत्पतन्ति। उद् + पत् = उत्पतन्ति। ऋग्वेदः - 1.164.47

(vii) न ते गिरो अपि मृष्ये तुरस्य।अपि मृष् = अपिमृष्ये। कौथुमसंहिता – 2.1799

(viii) प्रजानन् यज्ञमुप याहि विद्वान्त्स्वाहा॥ उप या = उपयाहि। माध्यन्दिनसंहिता – 8.20

(ix) यस्य द्यावो न विचरन्ति मानुषम्। वि चट् = विचरन्ति। कौथुमसंहिता – 1.373

(x) ज्यावाजं परिणयन्त्याजौ। परि णी = परिणयन्ति॥ ऋग्वेदः - 3.33.24

### २. छन्दसि परप्रयोगस्योदाहरणम्। यथा

)i) क्रतुं वृञ्जन्त्यपि वृत्रहत्ये। वृज् + अपि = वृञ्जन्त्यपि। ऋग्वेदः - 6.3.2

(ii) येना हंसि न्याउत्रिणं तमीमहे। हन् + नि = हंसि नि। कौथुमसंहिता – 1.394

(iii) इन्द्रस्य वोचं प्रकृतानि वीर्या। वच् + प्र = वोचं प्र। ऋग्वेदः - 2.21.3

---

4 महाभाष्यम् पस्पसाह्निकम् – पृ.३।
5 महाभाष्यम् पस्पसाह्निकम् उद्योत: – पृ.३१।
6 ऋग्वेदसंहिता – सायणभाष्यम् - १/१६४/४५।
7 निरुक्तम्-दुर्गाव्याख्या - १/१/३।
8 नाट्यशास्त्रम् - अभिनवगुप्तव्याख्या - १४/२६।
9 निरुक्तम्-महेश्वरव्याख्या - १/१/३।
10 शब्दकल्पद्रुमः-प्रथमकाण्डः – पृ.२३१।
11 शुक्लयजुर्वेदस्योव्वटाचार्यप्रस्तावना।
12 बृहदेवता – २/९/६।
13 महाभाष्यम् – २/१/१।
14 जैनशाकटायनीयधातुपाठः – १२।
15 मुग्धबोधव्याकरणम्-दुर्गादास – पृ.१९।

ISSN : 2583-2271
Vol. - I, No. 1: 2021

(iv) परैणान्देवः सविता ददातु परा। दा + परा = ददातु परा॥ शौनकीयसंहिता – 8.3.16

(v) हन्ति रक्षो बाधते पर्यरातिम्। बाध् + परि = बाधते परि। कौथुमसंहिता – 1.540

(vi) यजत्येव द्विषो देवानामव द्विषः। यज् + अव = यजति अव। शौनकीयसंहिता – 20.67.1

(vii) वयो न सीदन्नधि बर्हिषि प्रिये। सद्‌ + अधि = सीदन्नधि। ऋग्वेदः - 1.85.7

(viii) याभिरिन्द्रमनयन्नत्यरातीः। नी + अति =अनयत् अति। माध्यन्दिनसंहिता - 10.1

(ix) यमदीषामदो मनस्तदैतूप मामिहा। इ + उप = एतु उप। शौनकीयसंहिता – 19.52.4

(x) मायाविनं वृत्रमस्फुरन्निः। स्फर् + निस् = अस्फुरत् निस्। ऋग्वेदः - 2.11.9

**३. छन्दसि व्यवहितप्रयोगस्योदाहरणम्। यथा**

)i) उप ये त्वा गृणन्ति वन्हयः। उप + गृ = उप... गृणन्ति। ऋग्वेदः - 1.48.12

(ii) वि होत्रा दधे वयुनाविदेक इन्मही। वि + धा = वि...दधे माध्यन्दिनसंहिता - 5.14

(iii) परित्वाग्ने पुरं वयं विप्रं सहस्य धीमहि। परि + धी = परि धीमहि। शौनकीसंहिता – 8.3.22

(iv) कुवितमस्य प्र हि व्रजं गोमन्तं दस्युहागमत्। प्र + गम् = प्र.......गमत्॥ ऋग्वेदः – 6.45.24

(v) याश्च ते हस्त इषवः परा ता भगवो वप। परा + वप् = परा...वप। माध्यन्दिनसंहिता – 16.9।

)vi) सं त्वा दधामि पृथिवीं पृथिव्या। सम् + धा = सं.........दधामि। शौनकीयसंहिता – 12.3.23।

)vii) अन्वेनं विप्रा ऋषयो मदन्ति। अनु + मद् =अनु......मदन्ति। ऋग्वेदः - 1.162.7।

)viii) निर्गा अकृन्तदोजसा। निर् + कृत = निर......अकृन्तत्। कौथुमसंहिता – 1/585।

)ix) आ च परा च चरति। आ + चर् = आ.......चरति। शौनकीयसंहिता – 7.9।

)x) अभि त्वा पूर्वऽपीतये सृजामि सौम्यं मधु। अभि + सृज् =अभि......सृजामि। ऋग्वेदः - 1.19.9।

**(ख) वैदिकभाषायां पादपूरणार्थका उपसर्गा:**

"प्रसमुपोद: पादपूरणे" )8.1.6) एषां द्वे स्त: पादपूरणे (सि.कौ.) प्र सम् उप उद् इत्येतेषां पादपूरणे द्वे भवतः, द्विर्वचनेन चेत् पाद: पूर्यते। लोके श्लोकचरणपूर्णतायां त्वादयः प्रवर्त्तन्ति। यथा – "तु हि च स्म ह वै पादपूरणे"[16]। परन्तु प्र सम् उप उद् एते उपसर्गाः प्रयागाभावात् भाषायामनर्थकं स्यात्। पादपूरणार्थे यथा –

)i) प्रप्रायमग्निर्भरतस्य शृण्वे। (ऋ. 7.8.4)।

)ii) संसमिधुवसे वृषन्। (ऋ.10.191.1)।

)iii) उपोप मे परा भृश। (ऋ.1.126.7)।

)iv) किं नोदद् हर्षसे दातवा उ। (ऋ.10.176.2)।

)v) प्रप्रक्षयाय पन्यसे जनाय। (कौथुमसंहिता – 2.935)।

)vi) उदुत्ते मधुमत्तमा गिरस्तोमास ईरत। (मैत्रायणीसंहिता – 1.3.39)।

)vii) उपोप ह वा एनं पशवो यान्ति नापयन्ति य एवं वेद। (मौत्रायणीसंहिता - 4.2.8)।

)viii) सं सं स्रवन्तु पशव: समश्वा: सम पुरुषा॥ (शौनकीय संहिता – 2.263)। एवंप्रकारेण "प्र"उपसर्गस्य द्वाविंशतिस्थलेषु, "सम्" उपसर्गस्य अष्टसु स्थलेषु, "उप" उपसर्गस्य चतुर्दशस्थानेषु, "उद" उपसर्गस्य त्रिषु स्थलेषु सूत्रानुसारं प्रयोगो दृश्यते।[17]

पादपूरण इति किम्? प्रदेवं देव्या धिया (ऋ. - 10.176.2)। अत्र पादपूर्णत्वात् न दित्वकार्यम्।

**(ग) वैदिकभाषायां वीप्सामूलका उपसर्गाः**

वैदिकसंहितास्वेतादृशा उपसर्गाणां व्यवहारो दृश्यन्ते। यस्तेषां स्वतन्त्रपदसामर्थ्यमथ च स्वतन्त्रार्थसामर्थ्य क्रियानिराकाङ्क्षत्वेन, नामनिराकाङ्क्षत्वेन चाभिव्यक्तं भवति। वैदिक संहितायाम् एकस्यैवोपसर्गस्याभ्यासेन वीप्सया प्रयोगो अवलोक्यन्ते। यथा –

(i) अधोऽधः (नीचैर्नीचैः) – "अध" इत्युपसर्ग ऋग्वेदे वीप्सया प्रयुक्तः। तथा हि मन्त्रः – "अधा शधीत निर्ऋतेरुपस्थेऽधेनं वृका" इति (ऋ.सं.10.95.14)। अस्मिन् मन्त्रेऽधशब्दोऽर्थभूयस्त्वायाभ्यस्तः। यथा – "अध + अध + शी(ङ्) - स्वप्ने।अधोऽध: शयीत – भूमौ शयीत इत्यर्थः।

)ii) अपाप (उत्कृष्टतयापोहति)। ऋग्वेदे "अप" इत्यस्याभ्यासो दृश्यते। यथा – अपाप शक्रस्ततनुष्टिमूहति तनूशुभं मघवा यः कवासख" इति (ऋ.स.- 5.34.3)। अप + अप + उह (वितर्के) = अपापोहति = अत्युत्कृष्टतयापोहति। इत्यर्थः।

)iii) अभि + अभि = अभ्यभि (पौन:पुन्येन) छन्दसि "अभि" इत्यस्याभ्यासो बहुबोपलभ्यते। यथा – "अभि त्वा गोतमा गिरा जातवेदो विचर्षणे द्युम्नेरभि प्रणानुमः" इति (ऋ. - 1.78.1)।अत्र स्कन्दस्वामिनोक्तं यत् - "अभि" इत्युपसर्गः "प्रणोनुम" इत्याख्यातेन सम्बध्यते।अभि अभि प्रणोनुमः। यत्र पौन:पुन्येनोपसर्गाभ्यासः, तत्र तत्सम्बन्धिन: क्रियापदस्याप्यभ्यासो द्रष्टव्यः।अभिप्रणोनुमः, अभि प्रणोनुमः इति। अत्र स्कन्दाचार्यो निर्दिशति यद् उपसर्गाभ्यासादख्यातस्याप्यभ्यासः कर्त्तव्योऽर्थभूयस्त्वाय।

)iv) परा + परा = परापरा (अत्यन्तपरा) - अत्यन्तदूर्ध्ववर्तिनी इत्यर्थः। ऋग्वेदे परा इत्यपुसर्गस्याप्यभ्यासोऽवलोक्यते। यथा – मो

---

[16] अमरकोषः-अव्ययवर्गः – पृ.४४४।

[17] पाणिनीय वैदिकसूत्रमीमांसा – पृ.५६९।

ISSN : 2583-2271
Vol. - I, No. 1: 2021

षु णः परापरा निर्ऋतिर्दुर्हणा वधीत्'' इति (ऋ.सं.- 1.38.6)। युष्मत्प्रसादादेव दूरवर्तिनीत्यर्थः'' इति।

**(घ) वैदिकसाहित्ये प्रादयो भिन्ना उपसर्गा:**

वैदिकवाङ्मये उपसर्गसंख्यासीमा-निर्धारणे महदन्तरायभूतार्थातिशययोर्गाज-धृक्षेव। अत्राधस्तात् केचनैतादृशाः ''उपसर्गाः क्रियायोगे'' इति परिभाषाऽनुविद्धा अनुस्यूताश्च वैदिकोपसर्गाः प्रस्तूयन्ते, येषां प्रयोगा निरुक्तादनु स्थगितप्रायाः, किन्तु वैदिकसाहित्ये तु ते उपसर्गत्वेनामृष्टा व्याख्यातृभिर्व्याख्याताश्च। यथा –

)i) अपाक् (अधीगमनार्थे) – ''एवैवापागपरे सन्तु दूढ्यो'' (ऋ.सं. - 10.45.7) अत्र अपाक् शब्द उपसर्गरूपेण प्रयुक्तः। सायणाचार्येण उक्तम् – अपरे अपाक् सन्तु, अधोगन्तारो भवन्तु इति। अपाक् + अस् (भुवि) = अपाक् सन्तु।

)ii) अरम् (वारणार्थे)। हविष्मन्तो अरंकृत: (ऋ.सं.- 1.14.5) सायणाचार्येण प्रतिपादितम् – अरंकृत: - अलंकुर्वन्तीत्यरंकृतः। परवर्त्तिकाले संस्कृतसाहित्ये तु अलम् इति निपातो व्यवह्रियते। तथाहि - अरम् = कृ (करणे) =अरंकृतः) अलंकृतः = भूषित इत्यर्थः। दृश्यते च वैदिकेरेफध्वनेलौकिक-संस्कृतभाषायां लत्वम् र् > ल, यथा – रघुः, रघ्वी > लघ्वी चेति।

)iii) अर्वाक् (अभिमुखार्थे) – यथा - अर्वाडेहि सोमकामं त्वाहुरयं सुतस्तस्य पिवा मदाय'' इति (अ.वे.-20.9.2) विशेषतो गम्, भू, पत्, कृ, प्रभृतिभिर्धातुभिः सह अस्योपसर्गता दृश्यते।

(iv) आशु (शीघ्रार्थे) – ''आयर्ददाशुर्वाजेभिराशुषाणा:'' इति (ऋ.सं.- 1.147.1)। ''आशु + षण (संभक्तौ = आशुषाणाः - शीघ्र संभक्तारः। एवमेव आप, त्रै, प्रभूतिभिरिति धातुभिः सह आशुशब्द-उपसर्गत्वेन प्रत्युक्तः। तैत्तिरीयसंहितायां भट्टभास्करेणोक्तम् - आशुपसर्गस्य अक्षरयो: स्थानविनिमयः॥

)v) कुवित् (बह्वर्थे)। ''मन्त्रं वोचेम कुविदस्य वेदत्'' (ऋ.सं. - 2.35.2)।

)vi) ज्योक् (चिरार्थे) - ज्योगभुवन्ननुधूपितासो हत्वी तेषामाभरा नो वसूनि'' इति (ऋ.सं.- 2.31.10)।

)vii) न (अतिशयार्थे) - देवो भुवन्नवन्वेदा म ऋतानां नमो जगृभ्वाँ अभि यज्जुजोषत्'' (ऋ.सं. - 4.23.4)।

)viii) पुरु (बह्वर्थे) – ''क्व त्या वल्गू पुरुहूताद्य दूतो न स्तोमोऽविदब्बभस्वान्'' इति (ऋ.सं.- 6.63.1)।

)ix) पुरस् (अग्रगमनार्थे, सत्कारार्थे च) – '' श्रद्दोवा अदधतागच्छसुरोधां य एवं विद्वान्'' इति (तै.सं.- 7.4.1)।

)x) मा (निषेधे, अङ्गीकारे च) मा इति शब्दो यद्यपि निपातस्तथापि बहुत्रास्य व्यवहार: क्रियानुषङ्गतयोपलभ्यते। लुङ्-लङ्लकारयोरडागमं निषेधयति, तेनापि सिद्ध्यति यदयं वैदिकभाषायामुपसर्गतायाऽपि प्रयुज्यमान आसीत्। तथा च – ''इमं जीवेभ्यः परिधिं दधामि मैषां नु गादपरो अर्थमेतत्'' (ऋ.सं.- 10.8.4)। अत्र मा शब्द क्रिययाऽनुषक्तव्यः इति अर्थात् क्रियासाकाङ्क्षस्सन् उपसर्गतयाऽस्य व्यवहारः।

)xi) वृथक् (पृथगर्थे) – ''यतन्ते वृथगग्नयः'' (ऋ.सं.- 8.34.4)।

)xii) वषट् (देवहविर्दाने) – ''स्वाहा देवहविर्दाने श्रौषड वौषट् स्वधा''।

)xiii) शू = (अव्यक्तवाचि) – ''यत्त सादे सहसा शूकृतस्य पार्ष्या वा कशया वा तुतोद'' इति (ऋ.सं. -1.62.17)।

)xiv) सना (चिरार्थे) – ''आ तिष्ठति मघवा सनश्रुत इन्द्रो वाजस्य दीर्घश्रवसस्पति'' इति (ऋ.सं. - 10.24.3)।

)xv) सीत् (उच्चशब्दनिर्घोषे) – ''मन्द्रा मध्यास्तथा तारा: सप्रपादस्तु सीत्कृतम्'' इति। (सिद्धशब्दार्णवः - 254.55)।

)xvi) हुरुक् (कुटिलार्थे) – ''महाँ अदब्धो वटुणो हुरुग्यते'' इति (ऋ.सं.- 9.77.5)। एवं वैदिकभाषायामेव विमृश्यमाणानामथ च वैदिकमन्त्रेष्वेव लब्धप्रयोगवतां केचनोपसर्गाणां व्यवहारा: अत्रोपलक्षणतयोदाहृताः।

**(ङ) वैदिकसाहित्ये धात्वर्थे उपसर्गाणां प्रयोगः**

उपसर्गाच्छन्दसि धात्वर्थे (5.1.118) धात्वर्थविशिष्टे साधने वर्तमानत्स्वार्थे वतिः स्यात्। यदद्वतो निवत: (ऋ.10.142.4) धातो: प्रागेव प्रायश उपसर्गाः प्रयुज्यन्ते। तत्र धातुर्धात्वर्थः क्रिया, अर्थ: प्रयोजनं यस्य साधनस्य तस्मिन् साधने वर्तमानात् उपसर्गात् स्वार्थे वतिप्रत्ययो भवति छन्दसि विषये। यथा – उद्गत इत्यर्थे, उद् + वति = उद्वतः, निर्गत इत्यर्थे नि + वति = निवतः। एवमुदाहरणं यथा –

)i) आ + वति = आवत:। आवतस्त आवत: परावत: आवतः॥ (शौ. - 5.30.1)

(ii) उद्। वति = उद्वतः। या: प्रवतो निवत उद्वत उदन्वतीरनुदकाश्च याः। (ऋ. - 7.50.4)

(iii) प्र + वति = प्रवतः। सप्त प्रति प्रवत आशयानम्। (ऋ. - 4.19.3)

(iv) परावति = परावतः।अथो शक्र परावतः। (ऋ. - 3.37.11))

(v) नि+वति = निवतः। योऽस्मत् पाकतर उन्निवता (तै. - 3.24.411)।

एवं प्रकारेण सूत्रस्यास्य प्रयोगो वेदे चतुर्विंशतिस्थलेषु दृश्यते।[18]

वैदिकभाषाया गवेषणप्रसङ्गे केचनैतादृशा अप्युपसर्गा दृष्टिपथमायाताः, येषां सङ्कलनमाचार्यपाणिनिस्वीकृत-निपाताव्ययेष्वेव दृश्यते। भारतीयवाङ्मयस्य अनुसन्धानेनेदमपि कथयितुं शक्यते यदुत्तरोत्तरम् उपसर्गाणां संख्या तनुतरायते कृशायते वा। वैदिक-साहित्ये निपातोपसर्गाणां चिन्तनमर्थनिर्धारणं च पदविज्ञानदृष्ट्या नावलोक्यते, अपितु द्योतकत्व-वाचकत्वदृशा ते विमृष्टाः। अत एव महामति-पतञ्जलिनापि सङ्केतितं यत् – ''उपलब्धौ यत्नः क्रियताम्। महान् शब्दस्य प्रयोगविषयः॥'' इति शम्।

[18] पाणिनीय वैदिकसूत्रमीमांसा – पृ.३४४।

ଔଊଉଈଓ

## सहायकग्रन्थसूची


- ऋग्वेदसंहिता-अनु•रामेश्वरम,हरफप्रकाशनी, कोलकाता,२०११
- यजुर्वेदसंहिता-अनु•श्रीविजनविहारी गोस्वामी,हरफप्रकाशनी,कोलकाता,२०११
- वैदिकधात्वर्थविचार-प्रो. सत्यदेवनिगमालंकारः, प्तिभाप्काशन, दिल्ली, २०१२
- वैदिकव्यारणम्-भवानीप्रसादभट्टाचार्यः-संस्कृतपुस्तकभण्डारम्,कोलकाता,१९८६
- पाणिनीयवैदिकसूत्रमीमांसा-सत्यदेवनिगमालंकारः, प्रतिभाप्रकाशन, दिल्ली, २००९
- रघुबंशमहाकाव्यम्-सञ्जीवनीटीका-मोतिलाल बनारसी, दिल्ली, २०१०
- अमरकोषः-रामाश्रमीटीका-चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, १९७३
- महाभाष्यम्-सम्पा•गुरुप्रसादशास्त्री-राष्ट्रिय-संस्कृत-संस्थानम्,नई दिल्ली,२००६
- निरुक्तम्-दुर्गाव्याख्या-चौखम्बा सुरभारती प्रकाशन, वाराणसी,१९९५
- शब्दकल्पद्रुमः-राधाकान्तदेवः-राष्टिय-संस्कृत-संस्थानम्-नई दिल्ली,२००६